

XMind
Trial Mode

# मुहूर्तचिन्तामणिः



# मुहूर्तचिन्तामणिः

XMind
Trial Mode



तिथीनाम् अधिपतयः -

तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहो रविः।

शिवो दुर्गान्तको विश्वे हरिः कामः शिवः शशी॥३॥

| तिथिसंख्या | तिथिनाम | अधिपः |
| --- | --- | --- |
| १ | प्रतिपत् | वह्निः=अग्निः |
| २ | द्वितीया | कः=प्रजापतिः |
| ३ | तृतीया | गौरी |
| ४ | चतुर्थी | गणेशः |
| ५ | पञ्चमी | अहिः=सर्पः |
| ६ | षष्ठी | गुहः=स्कन्दः |
| ७ | सप्तमी | रविः=सूर्यः |
| ८ | अष्टमी | शिवः |
| ९ | नवमी | दुर्गा |
| १० | दशमी | अन्तकः=यमः |
| ११ | एकादशी | विश्वे=विश्वेदेवाः |
| १२ | द्वादशी | हरिः=विष्णुः |
| १३ | त्रयोदशी | कामः=मन्मथः |
| १४ | चतुर्दशी | शिवः |
| १५/३० | पूर्णिमा/अमावास्या | शशी=चन्द्रः |


**तिथीनां संज्ञाः –**

नन्दा च भद्रा च जया च रिक्ता पूर्णेति तिथ्योऽशुभमध्यशस्ताः।

सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमार्किगुरौ च सिद्धाः॥४॥

| | तिथिसंज्ञाः | | | | |
| --- | --- | --- | --- | --- | --- |
| | नन्दा | भद्रा | जया | रिक्ता | पूर्णा |
| तिथिसंख्याः | १ | २ | ३ | ४ | ५ |
| | ६ | ७ | ८ | ९ | १० |
| | ११ | १२ | १३ | १४ | १५ |

प्रत्येकं मासे चन्द्रबिम्बस्य स्थितिः यथा –



एवं शुक्लपक्षे चन्द्रबिम्बे शुक्लवृद्धिः, कृष्णपक्षे च कृष्णवृद्धिः भवति। अतः चन्द्रबिम्बे शुक्लस्य वृद्धौ चन्द्रबलं भवति, कृष्णस्य वृद्धौ चन्द्रबलं न भवति इति विचार्य तद्वशात् नन्दादितिथीनां शुभाऽशुभत्वम् उच्यते यथा –

| | सिते=शुक्लपक्षे | | | | | |
|---|---|---|---|---|---|---|
| | नन्दा | भद्रा | जया | रिक्ता | पूर्णा | |
| तिथिसंख्याः | १ | २ | ३ | ४ | ५ | अशुभाः |
| | ६ | ७ | ८ | ९ | १० | मध्यमाः |
| | ११ | १२ | १३ | १४ | १५ | शुभाः |

| | असिते=कृष्णपक्षे | | | | | |
|---|---|---|---|---|---|---|
| | नन्दा | भद्रा | जया | रिक्ता | पूर्णा | |
| तिथिसंख्याः | १ | २ | ३ | ४ | ५ | शुभाः |
| | ६ | ७ | ८ | ९ | १० | मध्यमाः |
| | ११ | १२ | १३ | १४ | १५ | अशुभाः |

सिद्धयोगः –

तिथिवारयोः सम्बन्धेन सिद्धयोगः भवति। यथा –

| तिथयः | वारः | सिद्धयोगः |
|---|---|---|
| नन्दा=१-६-११ | सितः=शुक्रवासरः | |
| भद्रा=२-७-१२ | ज्ञः=बुधवासरः | |
| जया=३-८-१३ | भौमः=कुजवासरः | |
| रिक्ता=४-९-१४ | आर्किः=शनिवासरः | |
| पूर्णा=५-१०-१५ | गुरुः=गुरुवासरः | |

यदि पतिपत्तिथिः शुक्रवासरे भवति/षष्ठीतिथिः शुक्रवासरे भवति/एकादशीतिथिः शुक्रवासरे भवति तर्हि सिद्धयोगः जायते इत्यर्थः। एवमन्येषु वासरेषु अपि।

**मृततिथयः दग्धनक्षत्राणि च -**

नन्दा भद्रा नन्दिकाख्या जया च रिक्ता भद्रा पूर्णसंज्ञा मृताऽर्कात्।

याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठाऽर्यम्णं ज्येष्ठान्त्यं रवेर्दग्धभं स्यात्॥५॥

रव्यादिषु वासरेषु क्रमशः नन्दा-भद्रा-नन्दा-जया-रिक्ता-भद्रा-पूर्णातिथयः भवन्ति चेत् ताः मृतसंज्ञिकाः भवन्ति। अर्थात् ताः तिथयः अशुभफलदायिकाः भवन्ति।

| वारः | तिथयः | |
|---|---|---|
| रविवासरः | नन्दा (१-६-११ = प्र-ष-ए) | मृततिथयः |
| चन्द्रवासरः | भद्रा (२-७-१२ = द्वि-स-द्वा) | |
| कुजवासरः | नन्दा (१-६-११ = प्र-ष-ए) | |
| बुधवासरः | जया (३-८-१३ = तृ-अ-त्र) | |
| गुरुवासरः | रिक्ता (४-९-१४ = च-न-च) | |
| शुक्रवासरः | भद्रा (२-७-१२ = द्वि-स-द्वा) | |
| शनिवासरः | पूर्णा (५-१०-१५ = प-द-प) | |

एवमेव रव्यादिषु वासरेषु क्रमशः याम्यं=यमदेवताकं-**भरणी**, त्वाष्ट्रं=त्वष्टृदेवताकं=**चित्रा**, वैश्वदेवं=विश्वेदेवदेवताकं=**उत्तराषाढा**, धनिष्ठा, आर्यम्णं=अर्यमदेवताकं-**उत्तराफाल्गुनी**, ज्येष्ठा, अन्त्यं=**रेवती** च एतानि नक्षत्राणि भवन्ति चेत् दग्धयोगः जायते।

| वारः | नक्षत्राणि | |
|---|---|---|
| रविवासरः | भरणी | दग्धनक्षत्राणि |
| चन्द्रवासरः | चित्रा | |
| कुजवासरः | उत्तराषाढा | |
| बुधवासरः | धनिष्ठा | |
| गुरुवासरः | उत्तरफाल्गुनी | |
| शुक्रवासरः | ज्येष्ठा | |
| शनिवासरः | रेवती | |

**क्रकचयोगः संवर्तकयोगश्च (अधमयोगः)**

षष्ठ्यादितिथयो मन्दाद्विलोमं प्रतिपद्बुधे।

सप्तम्यर्केऽधमा षष्ठ्याद्यामाश्च रदधावने॥६॥

मन्दात्=शनिवासरात्, विलोमं=विपरीततया गणनायां, षष्ठ्यादितिथयः=६-७-८-९-१०-११-१२, भवन्ति चेत् अधमयोगः भवति। अयं क्रकचयोगः इत्यपि उच्यते। एवमेव बुधवासरे प्रतिपत् तिथिः, रविवासरे सप्तमीतिथिः च भवति चेत् अधमयोगः भवति। अयं संवर्तकयोगः इत्यपि उच्यते।

| अधमयोगः (क्रकचयोगः) | | | | | | | |
|---|---|---|---|---|---|---|---|
| वारः | शनिः | शुक्रः | गुरुः | बुधः | कुजः | चन्द्रः | रविः |
| तिथिः | ६ | ७ | ८ | ९ | १० | ११ | १२ |

| अधमयोगः (संवर्तकयोगः) | | |
|---|---|---|
| वारः | बुधः | रविः |
| तिथिः | १ | ७ |

**षष्ठ्यादितिथिषु निषिद्धकार्याणि -**

षष्ठ्यष्टमीभूतविधुक्षयेषु
नो सेवेत ना तैलपले क्षुरं रतम्।
नाभ्यञ्जनं विश्वदशद्विके तिथौ
धात्रीफलैः स्नानममाद्रिगोष्वसत्॥७॥

षष्ठ्याम्, अष्टम्यां, भूते=चतुर्दश्याम्, विधुक्षये=अमावास्यायां च क्रमेण तैलं=तैलपदार्थसेवनम्, पलम्=मांसभक्षणम्, क्षुरम्=केशकर्तनम्, रतम्=रतिक्रीडा च न= नैव कर्तव्यम्। विश्व-दश-द्विके=१३-१०-२ एतासु तिथिषु अभ्यञ्जनं= शिरस्सहितदेहाङ्गेषु तैलमर्दनेन स्नानम्, न = न कर्तव्यम्। अमा-अद्रि-गोषु= ३०-७-९ एतासु तिथिषु, धात्रीफलैः स्नानम् = आयुर्वेदशास्त्रोक्तरीत्या औषधस्नानम्, असत्=अशुभं भवति (न कर्तव्यम् इत्यभिप्रायः)।

| तिथयः | ६ | ८ | १४ | ३० | १३ | १० | २ | ३० | ७ | ९ |
|---|---|---|---|---|---|---|---|---|---|---|
| निषिद्धकार्याणि | तैलंसेवनं | मांसभक्षणं | केशकर्तनं | रतिक्रीडा | अभ्यञ्जनम् | | | औषधस्नानम् | | |

**दग्ध-विष-हुताशनयोगाः**

सूर्येशपञ्चाग्निरसाष्टनन्दा
वेदाङ्गसप्ताश्विगजाङ्कशैलाः।
सूर्याङ्गसप्तोरगगोदिगीशाः
दग्धा विषाख्याश्च हुताशनाश्च॥८॥
सूर्यादिवारे तिथयो भवन्ति

सूर्यादिवारे सूर्य-ईश-पञ्च-अग्नि-रस-अष्ट-नन्दाः तिथयः दग्धाः=दग्धसंज्ञिकाः भवन्ति।
सूर्यादिवारे वेद-अङ्ग-सप्त-अश्वि-गज-अङ्क-शैलाः तिथयः विषाख्याः=विषसंज्ञिकाः भवन्ति।
सूर्यादिवारे सूर्य-अङ्ग-सप्त-उरग-गो-दिक्-ईशाः तिथयः हुताशनाः=हुताशनसंज्ञिकाः भवन्ति।

| वारः | तिथयः | |
|---|---|---|
| रविवासरः | 12 | दग्धयोगः |
| चन्द्रवासरः | 11 | |
| कुजवासरः | 5 | |
| बुधवासरः | 3 | |
| गुरुवासरः | 6 | |
| शुक्रवासरः | 8 | |
| शनिवासरः | 9 | |

| वारः | तिथयः | |
|---|---|---|
| रविवासरः | 4 | विषयोगः |
| चन्द्रवासरः | 6 | |
| कुजवासरः | 7 | |
| बुधवासरः | 2 | |
| गुरुवासरः | 8 | |
| शुक्रवासरः | 9 | |
| शनिवासरः | 7 | |

| वारः | तिथयः | |
|---|---|---|
| रविवासरः | 12 | हुताशनयोगः |
| चन्द्रवासरः | 6 | |
| कुजवासरः | 7 | |
| बुधवासरः | 8 | |
| गुरुवासरः | 9 | |
| शुक्रवासरः | 10 | |
| शनिवासरः | 11 | |

**यमघण्टकयोगः**

मघाविशाखाशिवमूलवह्निः।

ब्राह्मं करोऽर्काद्यमघण्टकाश्च

शुभे विवर्ज्या गमने त्ववश्यम्॥९॥

अर्कात् = रविवासरात् – रविवासरम् आरभ्य सर्वेषु वासरेषु क्रमेण, मघा-विशाखा-शिव-मूल-वह्निः= मघा-विशाखा-आर्द्रा-मूल-कृत्तिकानक्षत्राणि, ब्राह्मं=ब्रह्मदेवताकं नक्षत्रं-रोहिणी, करः=हस्तः च यदि भवन्ति तर्हि यमघण्टकयोगः जायते।

| वारः | नक्षत्राणि | |
|---|---|---|
| रविवासरः | मघा | यमघण्टयोगः |
| चन्द्रवासरः | विशाखा | |
| कुजवासरः | आर्द्रा | |
| बुधवासरः | मूलम् | |
| गुरुवासरः | कृत्तिका | |
| शुक्रवासरः | रोहिणी | |
| शनिवासरः | हस्तः | |

**चैत्रादिमासेषु शून्यतिथयः –**

भाद्रे चन्द्रदृशौ नभस्यनलनेत्रे माधवे द्वादशी

पौषे वेदशरा इषे दशशिवा मार्गेऽद्रिनागा मधौ।

गोऽष्टौ चोभयपक्षगाश्च तिथयः शून्या बुधैः कीर्तिता

ऊर्जाषाढतपस्यशुक्रतपसां कृष्णे शराङ्गाब्धयः॥१०॥

शक्राः पञ्च सिते शक्राद्यग्निविश्वरसाः क्रमात्।

भाद्रे=भाद्रपदमासे, चन्द्र-दृशौ=१-२, नभसि=श्रावणमासे, अनल-नेत्रे=३-२, माधवे=वैशाखमासे, द्वादशी=१२, पौषे=पौषमासे, वेद-शराः=४-५, इषे=आश्वयुजमासे, दश-शिवाः=१०-११, मार्गे=मार्गशीर्षमासे, अद्रि-नागाः=७-८, मधौ=चैत्रमासे, गो-अष्टौ=९-८, च इति एवम् उभयपक्षगाः = शुक्लपक्षीयाः कृष्णपक्षीयाः च तिथयः, शून्याः= शून्यतिथयः, इति बुधैः कीर्तिताः= ज्योतिषिकैः उक्ताः वर्तन्ते।

एवमेव, ऊर्ज-आषाढ-तपस्य-शुक्र-तपसां=कार्तिक-आषाढ-फाल्गुन-ज्येष्ठ-माघमासानां कृष्णपक्षे, शर-अङ्ग-अब्धयः-शक्राः-पञ्च = ५-६-४-१४-५ तिथयः, सिते=शुक्लपक्षे, शक्र-अद्रि-अग्नि-विश्व-रसाः=१४-७-३-१३-६ तिथयः च शून्याः बुधैः कीर्तिताः।

| मासानां नामानि | शून्यतिथयः | |
|---|---|---|
| | शुक्लपक्षे | कृष्णपक्षे |
| भाद्रपदमासः | १ - २ | १ - २ |
| श्रावणमासः | ३ - २ | ३ - २ |
| वैशाखमासः | १२ | १२ |
| पौषमासः | ४ - ५ | ४ - ५ |
| आश्वयुजमासः | १० - ११ | १० - ११ |
| मार्गशीर्षमासः | ७ - ८ | ७ - ८ |
| चैत्रमासः | ९ - ८ | ९ - ८ |

| मासानां नामानि | शून्यतिथयः | |
|---|---|---|
| | शुक्लपक्षे | कृष्णपक्षे |
| कार्तिकमासः | १४ | ५ |
| आषाढमासः | ७ | ६ |
| फाल्गुनमासः | ३ | ४ |
| ज्येष्ठमासः | १३ | १४ |
| माघमासः | ६ | ५ |

**<u>निन्द्यनक्षत्राणि</u>**

तथा निन्द्यं शुभे सार्पं द्वादश्यां वैश्वमादिमे॥ ११॥

अनुराधा द्वितीयायां पञ्चम्यां पित्र्यभं तथा।

त्र्युत्तराश्च तृतीयायामेकादश्यां च रोहिणी॥ १२॥

स्वातीचित्रे त्रयोदश्यां सप्तम्यां हस्तराक्षसे।

नवम्यां कृत्तिकाष्टम्यां पूभा षष्ठ्यां च रोहिणी॥ १३॥

तथा= एवमेव, शुभे=शुभकर्मणि, द्वादश्यां=द्वादशीतिथौ, सार्पं=सर्पदेवताकम्-आश्लेषानक्षत्रम्; आदिमे= प्रतिपत्तिथौ, वैश्वम्=विश्वेदेवदेवताकम्= उत्तराषाढा; द्वितीयायां=द्वितीयातिथौ, अनूराधानक्षत्रम्; पञ्चम्यां= पञ्चमीतिथौ, पित्र्यभं=पितृदेवताकं मघानक्षत्रम्; तृतीयायां=तृतीयातिथौ, त्र्युत्तराः=उत्तराफल्गुनी उत्तराषाढा

उत्तराभाद्रपदा च; एकादश्यां= एकादशीतिथौ, रोहिणीनक्षत्रम्; त्रयोदश्यां= त्रयोदशीतिथौ, स्वातीचित्रे= स्वातीनक्षत्रं चित्रानक्षत्रं च; सप्तम्यां= सप्तमीतिथौ, हस्तराक्षसे= हस्तनक्षत्रं मूलनक्षत्रं च; नवम्यां= नवमीतिथौ, कृत्तिकानक्षत्रम्; अष्टम्यां= अष्टमीतिथौ, पूभा=पूर्वाभाद्रपदानक्षत्रम्; षष्ठ्यां= षष्ठीतिथौ, रोहिणीनक्षत्रं च; निन्द्यं= अशुभं भवति।

| तिथयः (शुक्लकृष्णपक्षयोः) | निन्द्यनक्षत्राणि |
|---|---|
| १२ | आश्लेषा |
| १ | उत्तराषाढा |
| २ | अनूराधा |
| ५ | मघा |
| ३ | उत्तराफल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा |
| ११ | रोहिणी |
| १३ | स्वाती चित्रा |
| ७ | हस्तः मूलम् |
| ९ | कृत्तिका |
| ८ | पूर्वाभाद्रपदा |
| ६ | रोहिणी |

**चैत्रादिमासेषु शून्यनक्षत्राणि**

कदास्रभे त्वाष्ट्रवायू विश्वेज्यौ भगवासवौ।

वैश्वश्रुती पाशिपौष्णे अजपादग्निपित्र्यभे॥ १४॥

चित्राद्वीशौ शिवाश्व्यर्काः श्रुतिमूले यमेन्द्रभे।

चैत्रादिमासे शून्याख्यास्तारा वित्तविनाशदाः॥ १५॥

चैत्रादिमासे=चैत्रादिषु चान्द्रमासेषु, क्रमेण, क-दास्रभे=रोहिणी-अश्विनी च, त्वाष्ट्र-वायू=चित्रा-स्वाती च, विश्व-इज्यौ= उत्तराषाढा-पुष्यं च, भग-वासवौ= पूर्वफल्गुनी-धनिष्ठा च, वैश्व-श्रुती= उत्तराषाढा-श्रवणं च, पाशि-पौष्णे= शतभिषक्-रेवती च, अजपात्= पूर्वाभाद्रपदम्, अग्नि-पित्र्यभे= कृत्तिका-मघा च, चित्रा-द्वीशौ= चित्रा-विशाखा च, शिव-अश्वि-अर्काः= आर्द्रा-अश्विनी-हस्तः च, श्रुति-मूले= श्रवणं-मूलं च, यम-इन्द्रभे= भरणी-ज्येष्ठा च, शून्याख्याः= शून्यसंज्ञिकाः, ताराः=तारकाः=नक्षत्राणि भवन्ति। एताः वित्तविनाशदाः= धननाशदाः भवन्ति।

| मासानां नामानि | शून्यनक्षत्राणि |
|---|---|
| चैत्रमासः | रोहिणी, अश्विनी |
| वैशाखमासः | चित्रा, स्वाती |
| ज्येष्ठमासः | उ.षाढा, पुष्यम् |
| आषाढमासः | पू.फल्गुनी, धनिष्ठा |
| श्रावणमासः | उ.षाढा, श्रवणम् |
| भाद्रपदमासः | शतभिषक्, रेवती |
| आश्वयुजमासः | पूर्वाभाद्रपदम् |
| कार्तिकमासः | कृत्तिका, मघा |
| मार्गशीर्षमासः | चित्रा, विशाखा |
| पौषमासः | आद्रा, अश्विनी, हस्तः |
| माघमासः | श्रवणम्, मूलम् |
| फाल्गुनमासः | भरणी, ज्येष्ठा |

**<u>चैत्रादिमासेषु शून्यराशयः</u>**

घटो झषो गौर्मिथुनं मेषकन्यालितौलिनः।

धनुः कर्को मृगः सिंहश्चैत्रादौ शून्यराशयः॥१६॥

चैत्रादौ=चैत्रादिषु चान्द्रमासेषु, क्रमेण, घटः=कुम्भराशिः, झषः=मीनराशिः, गौः=वृषभराशिः, मिथुनं= मिथुनराशिः, मेष-कन्या-अलि-तौलिनः=मेषराशिः कन्याराशिः वृश्चिकराशिः तुलाराशिश्च, धनुः=धनूराशिः, कर्कः=कर्काटकराशिः, मृगः=मकरराशिः, सिंहः=सिंहराशिः च, शून्यराशयः भवन्ति।

| मासानां नामानि | शून्यराशयः |
|---|---|
| चैत्रमासः | कुम्भः |
| वैशाखमासः | मीनः |
| ज्येष्ठमासः | वृषभः |
| आषाढमासः | मिथुनम् |
| श्रावणमासः | मेषः |
| भाद्रपदमासः | कन्या |
| आश्वयुजमासः | वृश्चिकः |
| कार्तिकमासः | तुला |
| मार्गशीर्षमासः | धनुः |
| पौषमासः | कर्कः |
| माघमासः | मकरः |
| फाल्गुनमासः | सिंहः |

**<u>तिथिषु शून्यलग्नानि</u>**

पक्षादितस्त्वोजतिथौ घटैणौ

मृगेन्द्रनक्रौ मिथुनाङ्गने च।

चापेन्दुभे कर्कहरी हयान्त्यौ

गोऽन्त्यौ च नेष्टे तिथिशून्यलग्ने॥ १७॥

पक्षादितः=प्रतिपत्तिथिम् आरभ्य, ओजतिथौ=विषमसंख्याकतिथौ (अर्थात् १,३,५,७,९,११,१३,१५ एतासु तिथिषु) क्रमेण घट-एणौ=तुला-मकरौ, मृगेन्द्र-नक्रौ=सिंह-मकरौ, मिथुन-अङ्गने=मिथुन-कन्ये, चाप-इन्दुभे=धनुः-कर्कटौ, कर्क-हरी= कर्क-सिंहौ, हय-अन्त्यौ= धनु-र्मीनौ, गो-अन्त्यौ=वृष-मीनौ च, तिथिशून्यलग्ने = तिथिषु शून्यसंज्ञके लग्ने, नेष्टे=अशुभे भवतः।

| तिथयः | शून्यलग्नानि |
|---|---|
| १ | तुला, मकरः |
| ३ | सिंहः, मकरः |
| ५ | मिथुनम्, कन्या |
| ७ | धनुः, कर्काटकः |
| ९ | कर्कः, सिंहः |
| ११ | धनुः, मीनः |
| १३ | वृषभः, मीनः |

**<u>शून्यलग्नादीनां प्रदेशविशेषवशात् अशुभत्वम्</u>**

तिथयो मासशून्याश्च शून्यलग्नानि यानि च।

मध्यदेशे विवर्ज्यानि न दूष्याणीतरेषु तु॥ १८॥

पङ्गन्धकाणलग्नानि मासशून्याश्च राशयः।

गौडमालवयोस्त्याज्या अन्यदेशे न गर्हिताः॥ १९॥

मासशून्यतिथयः, शून्यलग्नानि च यानि पूर्वं प्रोक्तानि तानि भारतस्य मध्यभागे ये प्रदेशाः भवन्ति तत्रैव वर्ज्यानि भवन्ति। अन्येषु देशेषु तानि ग्राह्याणि एव भवन्ति। अर्थात् मध्यदेशं विहाय अन्येषु देशेषु शून्यतिथिदोषः शून्यलग्नदोषः च नास्ति। पङ्गुलग्न-अन्धलग्न-काणलग्नदोषः शून्यराशिदोषश्च गौडदेशे मालवदेशे च त्याज्यः भवति। अन्यदेशेषु तेषां दोषप्रदत्वं नास्ति।

**<u>सर्वकार्येषु वर्जनीयाः कालविशेषाः –</u> (तिथि-वार-नक्षत्राणां सम्बधवशात्)**

वर्जयेत्सर्वकार्येषु हस्तार्कं पञ्चमीतिथौ।

भौमाश्विनीं च सप्तम्यां षष्ठ्यां चन्द्रैन्दवं तथा॥२०॥

बुधानुराधामष्टम्यां दशम्यां भृगुरोहिणीम्।

नवम्यां गुरुपुष्यं चैकादश्यां शनिरोहिणीम्॥२१॥

पञ्चम्यां हस्तार्कं= पञ्चमीतिथौ भानुवासरे हस्तनक्षत्रम्, सप्तम्यां भौमाश्विनीं= सप्तमीतिथौ कुजवासरे अश्विनीनक्षत्रम्, षष्ठ्यां चन्द्रैन्दवं= षष्ठीतिथौ सोमवासरे (ऐन्दवम्=इन्दोः इदं नक्षत्रम्=इन्दुदेवताकं नक्षत्रम् ) मृगशीर्षनक्षत्रम्, अष्टम्यां बुधानुराधाम्= अष्टमीतिथौ बुधवासरे अनुराधानक्षत्रम्, दशम्यां भृगुरेवतीं= दशमीतिथौ शुक्रवासरे (भृगुः=शुक्रः) रेवतीनक्षत्रम्, नवम्यां गुरुपुष्यं = नवमीतिथौ गुरुवासरे पुष्यनक्षत्रम्, एकादश्यां शनिरोहिणीं= एकादशीतिथौ शनिवासरे रोहिणीनक्षत्रम्, च सर्वकार्येषु वर्जयेत्।

| तिथिः | वारः | नक्षत्रम् | फलम् |
|---|---|---|---|
| पञ्चमी | रविवासरः | हस्तः | अशुभम् । (अतः सर्वकार्येषु वर्ज्यम्) |
| षष्ठी | चन्द्रवासरः | मृगशीर्षम् | |
| सप्तमी | कुजवासरः | अश्विनी | |
| अष्टमी | बुधवासरः | अनूराधा | |
| नवमी | गुरुवासरः | पुष्यम् | |
| दशमी | शुक्रवासरः | रेवती | |
| एकादशी | शनिवासरः | रोहिणी | |

गृहप्रवेशे यात्रायां विवाहे च यथाक्रमम्।

भौमाश्विनीं शनौ ब्राह्मं गुरौ पुष्यं विवर्जयेत्॥२२॥

गृहप्रवेशे= नूतनगृहप्रवेशकार्ये, भौमाश्विनीं= कुजवासरे अश्विनीनक्षत्रम्, यात्रायां= दूरदेशयात्रासमये अथवा तीर्थयात्रासमये, शनौ= शनिवासरे, ब्राह्मं= ब्रह्मदेवताकं रोहिणीनक्षत्रम्, विवाहे= विवाहकर्मणि, गुरौ = गुरुवासरे, पुष्यं= पुष्यनक्षत्रम्, विवर्जयेत्= त्यजेत्। अर्थात् कुजवासरे अश्विनीनक्षत्रं भवति चेत् तद्दिने नूतनगृहप्रवेशः न कर्तव्यः, शनिवासरे रोहिणीनक्षत्रं भवति चेत् तद्दिने दूरदेशयात्रा न आरम्भणीया, गुरुवासरे पुष्यनक्षत्रं भवति चेत् तद्दिने विवाहः न कार्यः इति।

**आनन्दादयः २८ योगाः**

आनन्दाख्यः कालदण्डश्च धूम्रो

धाता सौम्यो ध्वांक्षकेतू क्रमेण।

श्रीवत्साख्यो वज्रकं मुद्गरश्च

छत्रं मित्रं मानसं पद्मलुम्बौ॥ २३॥

उत्पातमृत्यू किल काणसिद्धी

शुभोऽमृताख्यो मुसलं गदश्च।

मातङ्गरक्षश्चरसुस्थिराख्याः

प्रवर्धमनाः फलदाः स्वनाम्ना॥ २४॥

| | | | | | | |
|---|---|---|---|---|---|---|
| १)आनन्दः | २) कालदण्डः | ३) धूम्रः | ४) धाता | ५) सौम्यः | ६) ध्वांक्षः | ७) केतुः |
| ८) श्रीवत्सः | ९) वज्रकम् | १०) मुद्गरः | ११) छत्रम् | १२) मित्रम् | १३) मानसम् | १४) पद्मम् |
| १५) लुम्बः | १६) उत्पातः | १७) मृत्युः | १८) काणः | १९) सिद्धिः | २०) शुभः | २१) अमृतम् |
| २२) मुसलम् | २३) गदः | २४) मातङ्गः | २५) रक्षः | २६) चरः | २७) सुस्थिरः | २८) प्रवर्धमानः |

एते अष्टाविंशतिः योगाः, स्वनाम्ना फलदाः= नामसदृशफलप्रदाः भवन्ति।

**आनन्दादियोगानां गणनाक्रमः**

दास्रादर्के मृगादिन्दौ सार्पाद्भौमे कराद्बुधे।

मैत्राद्गुरौ भृगौ वैश्वाद्गण्या मन्दे च वारुणात्॥ २५॥

अर्के= रविवासरे, दास्रात्= अश्विनीनक्षत्रात्; इन्दौ = सोमवासरे, मृगात्= मृगशीर्षनक्षत्रात्; भौमे= कुजवासरे, सार्पात् = आश्लेषानक्षत्रात्; बुधे= बुधवासरे, करात्= हस्तनक्षत्रात्; गुरौ= गुरुवासरे, मैत्रात्= अनूराधानक्षत्रात्; भृगौ= शुक्रवासरे, वैश्वात्= उत्तराषाढानक्षत्रात्; मन्दे= शनिवासरे, वारुणात्= शतभिषङ्नक्षत्रात्, गण्या= गणनीया (अर्थात् तत्तद्वासरम् आरभ्य क्रमेण तत्तन्नक्षत्राणि अभिजित्सहितानि २८=नक्षत्राणि गणनीयानि) तदा क्रमेण आनन्दादयः योगाः भवन्ति।

अर्थात् – रविवासरे अश्विनीमारभ्य रेवतीपर्यन्तम्, सोमवासरे मृगशीर्षमारभ्य रोहिणीपर्यन्तम्, मङ्गलवासरे आश्लेषानक्षत्रमारभ्य पुष्यनक्षत्रपर्यन्तम्, बुधवासरे हस्तनक्षत्रमारभ्य उत्तराफाल्गुनीनक्षत्रपर्यन्तम्, गुरुवासरे अनूराधानक्षत्रात् विशाखानक्षत्रपर्यन्तम्, शुक्रवासरे उत्तराषाढानक्षत्रमारभ्य पूर्वाषाढानक्षत्रपर्यन्तम्, शनिवासरे शतभिषङ्नक्षत्रात् धनिष्ठानक्षत्रपर्यन्तं क्रमेण २८ नक्षत्राणि कोष्ठके स्थाप्यानि तदा आनन्दादयः तत्तद्योगाः सम्भवन्ति।

| | वाराः | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अष्टाविंशतिः (२८) नक्षत्राणि | **रविवारः** | **चन्द्रवारः** | **कुजवारः** | **बुधवारः** | **गुरुवारः** | **शुक्रवारः** | **शनिवारः** | योगाः |
| | अश्विनी | मृगशिराः | आश्लेषा | हस्तः | अनूराधा | उ.षाढा | शतभिषक् | **आनन्दः** |
| | भरणी | आर्द्रा | मघा | चित्रा | ज्येष्ठा | अभिजित् | पू.भाद्रा | **कालदण्डः** |
| | कृत्तिका | पुनर्वसु | पू.फल्गुनी | स्वाती | मूलम् | श्रवणम् | उ.भाद्रा | **धूम्रः** |
| | रोहिणी | पुष्यम् | उ.फल्गुनी | विशाखा | पू.षाढा | धनिष्ठा | रेवती | **धाता** |
| | मृगशिराः | आश्लेषा | हस्तः | अनूराधा | उ.षाढा | शतभिषक् | अश्विनी | **सौम्यः** |
| | आर्द्रा | मघा | चित्रा | ज्येष्ठा | अभिजित् | पू.भाद्रा | भरणी | **ध्वांक्षः** |
| | पुनर्वसु | पू.फल्गुनी | स्वाती | मूलम् | श्रवणम् | उ.भाद्रा | कृत्तिका | **केतुः** |
| | पुष्यम् | उ.फल्गुनी | विशाखा | पू.षाढा | धनिष्ठा | रेवती | रोहिणी | **श्रीवत्सः** |
| | आश्लेषा | हस्तः | अनूराधा | उ.षाढा | शतभिषक् | अश्विनी | मृगशिराः | **वज्रम्** |
| | मघा | चित्रा | ज्येष्ठा | अभिजित् | पू.भाद्रा | भरणी | आर्द्रा | **मुद्गरः** |
| | पू.फल्गुनी | स्वाती | मूलम् | श्रवणम् | उ.भाद्रा | कृत्तिका | पुनर्वसु | **छत्रम्** |
| | उ.फल्गुनी | विशाखा | पू.षाढा | धनिष्ठा | रेवती | रोहिणी | पुष्यम् | **मित्रम्** |
| | हस्तः | अनूराधा | उ.षाढा | शतभिषक् | अश्विनी | मृगशिराः | आश्लेषा | **मानसम्** |
| | चित्रा | ज्येष्ठा | अभिजित् | पू.भाद्रा | भरणी | आर्द्रा | मघा | **पद्मम्** |
| | स्वाती | मूलम् | श्रवणम् | उ.भाद्रा | कृत्तिका | पुनर्वसु | पू.फल्गुनी | **लुम्बः** |
| | विशाखा | पू.षाढा | धनिष्ठा | रेवती | रोहिणी | पुष्यम् | उ.फल्गुनी | **उत्पातः** |
| | अनूराधा | उ.षाढा | शतभिषक् | अश्विनी | मृगशिराः | आश्लेषा | हस्तः | **मृत्युः** |
| | ज्येष्ठा | अभिजित् | पू.भाद्रा | भरणी | आर्द्रा | मघा | चित्रा | **काणः** |
| | मूलम् | श्रवणम् | उ.भाद्रा | कृत्तिका | पुनर्वसु | पू.फल्गुनी | स्वाती | **सिद्धिः** |
| | पू.षाढा | धनिष्ठा | रेवती | रोहिणी | पुष्यम् | उ.फल्गुनी | विशाखा | **शुभः** |
| | उ.षाढा | शतभिषक् | अश्विनी | मृगशिराः | आश्लेषा | हस्तः | अनूराधा | **अमृतम्** |
| | अभिजित् | पू.भाद्रा | भरणी | आर्द्रा | मघा | चित्रा | ज्येष्ठा | **मुसलम्** |
| | श्रवणम् | उ.भाद्रा | कृत्तिका | पुनर्वसु | पू.फल्गुनी | स्वाती | मूलम् | **गदः** |
| | धनिष्ठा | रेवती | रोहिणी | पुष्यम् | उ.फल्गुनी | विशाखा | पू.षाढा | **मातङ्गः** |
| | शतभिषक् | अश्विनी | मृगशिराः | आश्लेषा | हस्तः | अनूराधा | उ.षाढा | **रक्षः** |
| | पू.भाद्रा | भरणी | आर्द्रा | मघा | चित्रा | ज्येष्ठा | अभिजित् | **चरः** |
| | उ.भाद्रा | कृत्तिका | पुनर्वसु | पू.फल्गुनी | स्वाती | मूलम् | श्रवणम् | **सुस्थिरः** |
| | रेवती | रोहिणी | पुष्यम् | उ.फल्गुनी | विशाखा | पू.षाढा | धनिष्ठा | **प्रवर्धमानः** |

अर्थात् रविवासरे अश्विनीनक्षत्रं भवति चेत् आनन्दयोगः सम्भवति। एवमेव सोमवासरे मृगशीर्षनक्षत्रं, कुजवासरे आश्लेषानक्षत्रं, बुधवासरे हस्तनक्षत्रं, गुरुवासरे अनुराधा, शुक्रवासरे उ.षाढा, शनिवासरे शतभिषक् नक्षत्रं च भवति चेत् आनन्दयोगः सम्भवति। एवमेव अन्ये अपि योगाः चिन्तनीयाः।

**<u>पूर्वोक्तेषु दुष्टयोगेषु वर्ज्यकालः</u>**

ध्वांक्षे वज्रे मुद्गारे चेषुनाड्यो
वर्ज्या वेदाः पद्मलुम्बे गदेऽश्वाः।
धूम्रे काणे मौसले भूर्द्वयं द्वे
रक्षोमृत्यूत्पातकालाश्च सर्वे॥ २६॥

आनन्दादिषु योगेषु ये दुष्टयोगाः सन्ति तेषु योगेषु कश्चन कालविशेषः एव दुष्टः भवति, अर्थात् यस्मिन् दिने दुष्टयोगः भवति तद्दिनं पूर्णरूपेण त्याज्यः न भवति तत्र कश्चन कालखण्डः एव दोषयुक्तः भवति इति अत्र उच्यते। यथा-

ध्वांक्षे= ध्वांक्षयोगे, वज्रे= वज्रयोगे, मुद्गरे=मुद्गरयोगे, च , इषुनाड्यः = ५ घटिकाः ; पद्मलुम्बे = पद्मयोगे लुम्बयोगे च, वेदाः = ४ घटिकाः; गदे= गदयोगे, अश्वाः = ७ घटिकाः; धूम्रे= धूम्रयोगे, भूः= एका घटिकाः; काणे = काणयोगे, द्वयम्= घटिकाद्वयम्; मौसले=मुलसयोगे, द्वे= २ घटिके, च वर्ज्याः= त्याज्याः। [अर्थात् सूर्योदयमारभ्य तावत्प्रमाणिकाः घटिकाः त्याज्याः, तदनन्तरं शुभम् इत्यभिप्रायः]


परन्तु, रक्षोमृत्यूत्पातकालाः = रक्षः मृत्युः उत्पातः च एतेषां कालाः, सर्वे वर्ज्याः = पूर्णरूपेण त्याज्याः।

<u>रवियोगः</u>

**सूर्यभाद्वेदगोतर्कदिग्विश्वनखसम्मिते।**

**चन्द्रर्क्षे रवियोगाः स्युर्दोषसङ्घविनाशकाः॥२७॥**

रविस्थितनक्षत्रात् ४-९-६-१०-१३-२० एतावत्संख्याके चन्द्रनक्षत्रे सति रवियोगः भवति। अयं सर्वेषां दोषाणां विनाशकरः स्यात्।




सूर्यभात्=सूर्यस्थितनक्षत्रात्, वेद-गो-तर्क-दिक्-विश्व-नखसम्मिते= ४-९-६-१०-१३-२० एतावत्संख्यके, चन्द्रर्क्षे= चन्द्रस्थितनक्षत्रे सति, रवियोगाः स्युः। एते दोषसङ्घविनाशकाः= सर्वेषां दोषाणां विनाशं कुर्वन्ति।

अर्थात् यस्मिन् नक्षत्रे रविः भवति तस्मात् नक्षत्रात् चन्द्रनक्षत्रं ४-९-६-१०-१३-२० एतत्संख्याकं यदि भवति तर्हि तद्दिने रवियोगः भवति इति। उदाहरणार्थं रविः मृगशिर्षनक्षत्रे, चन्द्रः पुष्यनक्षत्रे च वर्तते इति चिन्तयामः। तदा रिविस्थितनक्षत्रात् मृगशीर्षात् गणनावसरे चन्द्रस्थितं पुष्यनक्षत्रं चतुर्थं भवति। अतः अत्रः रवियोगः भवति इति ज्ञेयम्।

# करणविचारः


तिथ्यर्धं करणम् । प्रत्येकं तिथौ करणद्वयं भवति। तिथेः पूर्वार्धे एकं करणम्, उत्तरार्धे अन्यत् करणं च भवति।

तत्र १) चरकरणम् २) स्थिरकरणं चेति करणं द्विविधं भवति ।

चरकरणं तावत् – 1)बवः, 2)बालवः, 3)कौलवः, 4)तैतिलः, 5)गरः, 6)वणिक्, 7)भद्रा चेति सप्तविधम् ।

स्थिरकरणं तावत् – 1)शकुनिः, 2)चतुष्पात्, 3)नागवान्, 4)किंस्तुघ्नं चेति चतुर्विधम् ।

तद्यथा -




शुक्लपक्षस्य प्रतिपत्तिथेः उत्तरार्धम् आरभ्य कृष्णपक्षस्य चतुर्दशीतिथेः पूर्वार्धं यावत् ७ चरकरणानि अष्टकृत्वः (अष्टवारं) आवर्तन्ते। **७×८=५६ = चरकरणानि।**

कृष्णपक्षस्य चतुर्दशीतिथेः उत्तरार्धम् आरभ्य शुक्लपक्षस्य प्रतिपत्तिथेः पूर्वार्धं यावत् ४ स्थिरकरणानि क्रमशः भवन्ति। **४×१ = ४ स्थिरकरणानि**

**एवं १ मासः = ३० तिथयः । १ तिथिः = २ करणे । अतः ३०×२ = ६० करणानि । तत्र ५६ चरकरणानि, ४ स्थिरकरणानि । ५६+४=६० करणानि इति सिद्ध्यति ।**

| मासः | | | | | |
|---|---|---|---|---|---|
| **शुक्लपक्षः** | | | **कृष्णपक्षः** | | |
| तिथिसंख्या | पूर्वार्धम् | उत्तरार्धम् | तिथिसंख्या | पूर्वार्धम् | उत्तरार्धम् |
| १ | किंस्तुघ्नं | बवः | १ | बालवः | कौलवः |
| २ | बालवः | कौलवः | २ | तैतिलः | गरः |
| ३ | तैतिलः | गरः | ३ | वणिक् | **भद्रा** |
| ४ | वणिक् | **भद्रा** | ४ | बवः | बालवः |
| ५ | बवः | बालवः | ५ | कौलवः | तैतिलः |
| ६ | कौलवः | तैतिलः | ६ | गरः | वणिक् |
| ७ | गरः | वणिक् | ७ | **भद्रा** | बवः |
| ८ | **भद्रा** | बवः | ८ | बालवः | कौलवः |
| ९ | बालवः | कौलवः | ९ | तैतिलः | गरः |
| १० | तैतिलः | गरः | १० | वणिक् | **भद्रा** |
| ११ | वणिक् | **भद्रा** | ११ | बवः | बालवः |
| १२ | बवः | बालवः | १२ | कौलवः | तैतिलः |
| १३ | कौलवः | तैतिलः | १३ | गरः | वणिक् |
| १४ | गरः | वणिक् | १४ | **भद्रा** | शकुनिः |
| १५ | **भद्रा** | बवः | ३० | चतुष्पात् | नागवान् |

| भद्रायाः मुखपुच्छविचारः | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | शुक्लपक्षः | | | | कृष्णपक्षः | | | |
| तिथिः | ४ उत्तरार्धं | ८ पूर्वार्धं | ११ उत्तरार्धं | १५ पूर्वार्धं | ३ उत्तरार्धं | ७ पूर्वार्धं | १० उत्तरार्धं | १४ पूर्वार्धं |
| यामः | ५ | २ | ७ | ४ | ८ | ३ | ६ | १ |
| मुखघटी | एतेषां यामानाम् आदिमाः 5 घटिकाः | | | | | | | |
| यामाः | ८ | १ | ६ | ३ | ७ | २ | ५ | ४ |
| पुच्छघटी | एतेषां यामानाम् अन्तिमाः 3 घटिकाः | | | | | | | |

एकस्मिन् दिने 8 यामाः भवन्ति ।

1 day = 24 hrs.

24÷8 = 3 hrs. = 1 यामः ।

1 day = 60 घटिकाः(नाडिकाः)

60÷8= 7 घटिकाः 30 विघटिकाः = 1 यामः ।

मन्वादितिथयः –

| मनुसंख्या | मनुनाम | आरम्भतिथिः |
|---|---|---|
| १ | स्वायम्भुवः | चैत्रशुक्ल-तृतीया |
| २ | स्वारोचिषः | चैत्रशुक्ल-पूर्णिमा |
| ३ | उत्तमजः | कार्तिकशुक्ल-पूर्णिमा |
| ४ | तामसः | कार्तिकशुक्ल-द्वादशी |
| ५ | रैवतः | आषाढशुक्ल-दशमी |
| ६ | चाक्षुषः | आषाढशुक्ल-पूर्णिमा |
| ७ | वैवस्वतः | ज्येष्ठशुक्ल-पूर्णिमा |
| ८ | सावर्णिः | फाल्गुनशुक्ल-पूर्णिमा |
| ९ | दक्षसावर्णिः | आश्वयुजशुक्ल-नवमी |
| १० | ब्रह्मसावर्णिः | माघशुक्ल-सप्तमी |
| ११ | धर्मसावर्णिः | पौषशुक्ल-एकादशी |
| १२ | रौद्रपुत्रः | भाद्रपदशुक्ल-तृतीया |
| १३ | रौच्यः | श्रावणकृष्ण-अमावास्या |
| १४ | भौत्यकः | श्रावणकृष्ण-अष्टमी |

मधौ त्रितिथी — मधुः = चैत्रमासः

ऊर्जे तिथिरवी — ऊर्जः = कार्तिकमासः

शुचौ दिक्तिथी — शुचिः = आषाढमासः

ज्येष्ठे
अन्त्ये — द्वादशसु मासेषु अन्त्यः फाल्गुनः
तिथिः

इषे नव — इषः =आश्वयुजमासः

तपसि अश्वाः — तपः =माघमासः

सहस्ये शिवाः — सहस्यः=पौषमासः

भाद्रे अग्निः

नभसः अमाष्ट — नभसः= श्रावणमासः

युगादितिथय –

| युगसंख्या | युगनाम | आरम्भतिथिः |
|---|---|---|
| १ | कृतयुगं | कार्तिक-शुक्ल-नवमी |
| २ | त्रेतायुगं | वैशाख-शुक्ल-तृतीया |
| ३ | द्वापरयुगं | भाद्रपद-कृष्ण-त्रयोदशी |
| ४ | कलियुगं | माघ-कृष्ण-अमावास्या |

बाहुल-राधयोः सिते गोऽग्नी — बाहुलः=कार्तिकमासः; राधा=वैशाखमासः

भाद्रमाघासिते मदनदर्शौ

**<u>कालहोराधिपाः -</u>**

**अर्कः शुक्रो बुधश्चन्द्रो मन्दो जीवो धरासुतः।**

**क्रमशः कालहोरेशा ज्ञेया कक्ष्यानुरोधतः॥**

एकस्मिन् अहोरात्रे २४ कालहोराः भवन्ति । अत्र होरा = 1 hour इत्यर्थः । अतः प्रत्येकं hour मध्ये १ कालहोरा भवति । सूर्योदयमारभ्य प्रत्येकं होरायाम् एकैका कालहोरा भवति। यः वारः भवति तस्य वारस्य अधिपतिः प्रथमकालहोराधिपः भवति। ततः परं श्लोके उक्तेन क्रमेण (रवि-शुक्र-बुध-चन्द्र-शनि-गुरु-कुजाः) कालहोराधिपाः भवन्ति । यथा –

| | | वराः | | | | | | |
|---|---|---|---|---|---|---|---|---|
| होराः | घटिका | **रविवारः** | **चन्द्रवारः** | **कुजवारः** | **बुधवारः** | **गुरुवारः** | **शुक्रवारः** | **शनिवारः** |
| १ | २-३० | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
| २ | ५ | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः |
| ३ | ७-३० | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः |
| ४ | १० | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः |
| ५ | १२-३० | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः |
| ६ | १५ | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः |
| ७ | १७-३० | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः |
| ८ | २० | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
| ९ | २२-३० | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः |
| १० | २५ | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः |
| ११ | २७-३० | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः |
| १२ | ३० | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः |
| १३ | ३२-३० | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः |
| १४ | ३५ | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः |
| १५ | ३७-३० | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
| १६ | ४० | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः |
| १७ | ४२-३० | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः |
| १८ | ४५ | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः |
| १९ | ४७-३० | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः |
| २० | ५० | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः |
| २१ | ५२-३० | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः |
| २२ | ५५ | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
| २३ | ५७-३० | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः |
| २४ | ६० | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः |

रविवासरे सूर्योदयात् १ होरापर्यन्तं (२-३० नाडिकापर्यन्तं) यः कालः भवति तस्य अधिपतिः रविः। अनन्तरं द्वितीयहोराधिपः शुक्रः (२-३० to ५-००नाडिकापर्यन्तं द्वितीयहोरा भवति तदधिपः शुक्रः इत्यर्थः) । एवम् अग्रे अपि ज्ञातव्यम् ।